International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(2): 15-19
© 2024 IJMH
www.themultijournal.com
Received: 21-06-2024
Accepted: 26-06-2024
Publish : 29-06-2024

**Dr. P. Bhavanarayanacharyulu**
Asst. Professor,
Dept. of Vaikhānasa Āgama,
Sri Venkateswara Vedic-University,Tirupati

**Correspondence:**
**Dr. P. Bhavanarayanacharyulu**
Asst. Professor,
Dept. of Vaikhānasa Āgama,
Sri Venkateswara Vedic-University,Tirupati

# त्रिष्वागमेषूक्तोत्सवप्रशस्तिः

**Dr. Parasaram Bhavanarayanacharyulu**

**कुञ्चिकाशब्दाः** – अमूर्तभगवद्यजनम्, समूर्तभगवद्यजनम्, सवः, उत्सवः, मख, यज्ञ, देवयजनम्, देवयागम्, महोत्सवः इत्यादि।

**शोधप्रबन्धसारांशः -**

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
**एनां विदन्ति वेदेन तस्माद्वेदस्य वेदता**[1] ।।1।।

इन्द्रियार्थजन्यं ज्ञानं प्रत्यक्षं, "हेतुव्याप्तिग्रहे तर्कः क्वचित् शङ्का निवर्तकः"। प्रत्यक्षानुमानप्रमाणाभ्यां यदगम्यं तत्सर्वं शब्दप्रमाणरूपेण वेदेन वेद्यं भवति। धर्मार्थकाममोक्षेषु यत् यत् वेद्यं तद्वेदेभ्यः अवगम्यते। अत एव भारतीयचैतन्यसर्वस्वाः वेदाः अनाद्यनन्ताः सृष्टिरपि अनाद्या तथापि आधुनिकाः वेदस्य सृष्टेश्च जन्मकालं निश्चेतुं यतन्ते। नास्माकं तैः विवदिषा। वेदाः स्वतन्त्राः मानवानां अभ्युदयनिश्रेयसप्रवृत्तयः वेदेभ्यः एव संस्कृताः। अभ्युदयः लौकिकः त्रिवर्गरूपः निश्रेयसं मोक्षः। निर्गतं श्रेयः यस्मादिति निश्रेयसम्। यत् सर्वेभ्यः प्रशस्तं तत् श्रेयः प्रशस्य शब्दात् उत्तमः इत्यर्थे इयसुन् प्रत्यये प्रशस्यस्य श्रः (5-3-60) इति श्रादेशे श्रेयस् शब्दो भवति। यस्मादुत्तमागतिः भवति तत् श्रेयः। श्रेयसः प्राप्तये वेदाः मानवं स्वधर्मे स्थापयितुं वर्णाश्रमधर्मान् विधाय तदनुरूपं कर्मानुष्ठानं च निर्दिष्टवन्तः। ततः आत्मगुणानपि प्रत्येकं बोधयामासुः। तदुक्तं भगवद्गीतासु, उपनिषत्सु –

**ब्राह्मणक्षत्रियविशां शूद्राणां च स्वभावतः।**
**कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः**।। 41 ।।
**शमोदमस्तपश्शौचं क्षान्तिरार्जवमेव च।**
**ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्मस्वभावजम्**।। 42 ।।
**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।**
**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्**।। 43 ।।
**कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजम्।**
**परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्**।। 44 ।।
**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः**[2] । 45 ।
**सहयज्ञैः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेषवोऽस्त्विष्टकामधुक्**[3] ।।

ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां निसर्गेण तेषां स्वभावं प्रवृत्तिं चानुसृत्य वेदैरेव कर्तव्यानि विभक्तानि। **शमः**- (अन्तरिन्द्रियनिग्रहः), **दमः -** (बहिरिन्द्रियनिग्रहः), **तपः शौचं -** (कायिकं, वाचकं, मानसिकं च), **क्षमा -** ऋजुबुद्धिः, **ज्ञानं -** मोक्षविषयकं वेदशास्त्रयोः ज्ञानं विज्ञानम्[4]।
दैवे विश्वासः इत्येते गुणाः वेदबोधिताः **ब्राह्मण** सहजाः।

पराक्रमः परबलहरणं, धैर्यं, चातुर्यं, सङ्ग्रामात् अनिवृत्तिः, दातृत्वं, प्रभुत्वम् इत्येते गुणाः **क्षत्रियस्य** सहजाः। कृषिः गवां रक्षणं पोषणं वाणिज्यम् इत्येतानि वैश्यकर्माणि। शुश्रूषा केवला शूद्रकर्मा। एतेषु कर्मसु तारतम्यं नास्ति। यः स्वकर्मणि निरतः सः सिद्धिं प्राप्नोत्येव।

ब्रह्मा सृष्टिसमकालमेव यज्ञानपि सृष्ट्वा प्रजाः एवमुक्तवान्। अनेन यज्ञेन यूयं फलवत्यः भवत। यज्ञः एव युष्माकं सर्वकार्यसाधकः।

एवंविधस्य वेदोक्तस्य धर्मस्यानुष्ठानं महता क्लेशेन साध्यम्। मानसिकी, शारीरकी, धनरूपा च बलसम्पत्तिः अत्रापेक्षिता। वेदोक्त-कर्मणः अकरणे प्रत्यवायोऽपि दृष्टः। तस्मात् फलसिद्धिरपि न नियता। दरिद्राः यज्ञानुष्ठानं मनसापि चिन्तयितुम् अशक्ताः। एष विषयः महाभारते अरण्यपर्वणि एवं निरूपितः।

**ऋषिभिः क्रतवः प्रोक्ताः देवेष्विव यथाक्रमम्।**
**फलं चैव यथा तत्त्वं प्रेत्य चेह च सर्वशः।।** 13 ।।
**न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं महीपते।**
**बहूपकरणा यज्ञाः नानासम्भारविस्तृताः।।** 14 ।।
**प्राप्यन्ते पार्थिवैरेते समृद्धैर्वानरैः क्वचित्।**
**नार्थन्यूनोपकरणैरेकात्मभिरसंहितैः**[5] ।। 15 ।।

महर्षयः यज्ञकर्माणि द्विविधानि वदन्ति। कर्मपलसापेक्षः क्रतुः, फलनिरपेक्षः यज्ञाः। क्रतोः फलं इहलोके परलोके च क्रतुस्वभाव-मनुसृत्य भवति। दरिद्रेण बहुद्रव्यसाध्याः यज्ञाः कर्तुमशक्याः एव। राजानः ऐश्वर्यसम्पन्नाः वा नराः इमान् क्रतून् यज्ञान् वा कर्तुं प्रभवन्ति। अधनाः साधनरहिताश्च एकाकिनः क्रतुं कर्तुं न प्रभवन्ति। वेदधर्मप्रतिपादकान् यज्ञान् आचरितुं ये न शक्ताः तान् अनुग्रहीतुम् आगमशास्त्रप्रवर्तकाः महर्षयः साधारणजनानामपि तारणार्थं विग्रहा-राधनं यज्ञप्रतिनिधिं उक्तवन्तः। विग्रहाराधनोपकारकान् आगमानपि प्रोक्तवन्तः। यज्ञाः अमूर्तभगवद्यजनरूपाः विग्रहाराधनं समूर्तभगव-द्यजनं भवति। उभयोः फलसाम्यमङ्गीकृत्यापि विग्रहाराधनयज्ञस्य आधिक्यमपि निरूपितवन्तः। विग्रहाराधने यज्ञाचरणजन्याः क्लेशाः न भवन्ति, फलसिद्धिरपि नियता। यज्ञादिषु मन्त्रलोपे क्रियालोपे वा प्रत्यवायो भवति। विग्रहाराधने कदाचित् कोऽपि प्रत्यवायो न भवति। भक्तिमात्रेण तुष्टः भगवान् आराधनजन्यान् लोपान् सर्वान् क्षमते। आराधने आडम्बरमपि नेच्छति इति महाभारते गीतासु उद्योगपर्वणि च स्पष्टम्।

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।**
**तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः**[6] ।।
**अन्यत्पूर्णादपां कुम्भादन्यत्पादावसेचनात्।**
**अन्यत्कुशलसम्प्रश्नान्न चेच्छति जनार्दनः**[7] ।।

अवाप्तसमस्तकामः भगवान् अत्यल्पमपि भक्त्या समर्पितं कैङ्कर्यम-ङ्गीकृत्य भक्तमनुगृह्णाति।

**आत्मोपम्येन सर्वत्र समं पश्यति योऽर्जुन।**
**सुखं वा यदि वा दुःखं स योगी परमो मतः**[8] ।।

महर्षयः योगिनः सर्वान् प्राणिनः आत्मतुल्यान् मत्वा समदृष्ट्या आद्रियन्ते। सुखं दुःखमपि समं मन्वते न केवलं समकालिकान् भविष्यत्कालेऽपि जनाः सन्तारिताः भवेयुरिति इच्छया ते आगमान् निर्ममुः।

यथा – भगीरथः गङ्गां आनीय स्वपितॄन् तारितवान् तयैव गङ्गया सर्वे प्राणिनः मोक्षभाजो भवन्ति। यावन्तं कालं वसुन्धरा स्थिरा भवति तावन्तं कालं गङ्गा भगीरथश्च चिरस्मरणीयौ भवतः।

स्वकार्यनिर्वहणानन्तरं गङ्गां पुनः स्वर्लोकं न प्रापितवान् तथैव स्वयं तीर्णाः महर्षयः अनन्तरवर्तिनः अपि तारयामासुः। तपसा भगव-दनुग्रहं प्राप्य आलयान् निर्माय मूर्तीः प्रतिष्ठाप्य लब्धभगवदनुग्रहाः क्षेत्राणि शाश्वतानि कृत्वा भक्तान् तारयामासुः।

यज्ञपरिपूर्तये प्रतिसंवत्सरं वसन्ते आहिताग्नेः अग्निष्टोमः इव आलये नित्याराधनस्य साफल्यसम्पादनाय प्रतिवत्सरं महोत्सवः करणीयः अनेनैव संवत्सरोत्सवेन नित्याराधनं पूर्णं भवति। नित्यपूजया प्राप्यं परिपूर्णं फलमपि सिद्धं भवति। एवं वैदिकप्रक्रियामनुसृत्य समूर्ताराधननिरूपिकासु (वैखानस) आगमसंहितासु उत्सवशब्दार्थः, उत्सवनिमित्ताः, उत्सवप्रयोजनानि, उत्सवभेदाः च एवं निरूपिताः।

**उत्सवशब्दार्थविवरणम् -**

अत्रिप्रोक्त **"समूर्तार्चनाधिकरणे"** चतुःपञ्चाशत्तमेऽध्याये (54) यथा –

**अतःपरं तु वक्ष्येऽहमुत्सवारम्भमुत्तमम्।**
**देवदेवस्य विष्णोर्हि सर्वलोकशुभप्रदम्।।** 1 ।।
**उत्सवं सर्वलोकानां शान्तिपुष्टिकरं विदुः।**
**स वो यज्ञः समाख्यातः सर्वयज्ञविशेषतः।।** 2 ।।
**उत्कृष्टोऽयं यतस्तस्मादुत्सवस्त्विति कीर्त्यते**[9]।

**"यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः**[10] **"** (2-7-13) इत्यमरः।

एवं सवशब्दः त्रेताग्निसायुज्ये यज्ञे अपि रूढः।

आगमेषु प्रतिसंवत्सरं क्रियमाणे क्रियाकलापे अपि अन्वेति।

**उत्कृष्टः सवः –** उत्सवः, उत्सुवति उत्सवः षू-प्रेरणे (तुदादिपरस्मैपदि-सेट्) इति धातोः पचाद्यच् प्रत्यये अचिष्णुधातो ……… इति उवङ् आदेशे उत्सवः इति रूपम्। नित्यकर्माचरणाय महान् प्रेरकः इत्यर्थः। अनेन प्रेरणेन भगवदाराधने महान् उत्साहोऽपि भवति।

अत्रिप्रोक्तसंहितायामेव पञ्चपञ्चाशे अध्याये (55) उत्सवप्रयोजनमपि एवं निरूपितम्।

**अतःपरं प्रवक्ष्यामि विष्णोरुत्सवमुत्तमम्।**
**शान्तिदं वर्षदं नित्यमारोग्यं पुष्टिदं शुभम्।।** 1 ।।
**राष्ट्राभिवृद्धिदं चैव राज्ञश्च बलवर्धनम्**[11] ।2।

**काश्यपसंहितायामपि नवतितमे अध्याये उत्सवप्रयोजनं एवमुप-वर्णितम् –**

**एतदुत्सवेन देवेशः सुप्रीतो भवेत्, अनेनैव गोब्राह्मणादिचातु-र्वर्ण्यसमृद्धिः सस्यविवर्धनं माङ्गल्यं सर्वसम्पत्करमशुभनाशनं ग्रामा-दिशान्तिः सर्वकामावाप्तिश्च भवति। एतेन सर्वे देवाश्च प्रीताः भवेयुः। तस्माद्विष्णोरुत्सवं भक्त्या यः कुर्यात् सोऽयं रहस्यानि प्रकाशानि च पापानि पूर्वजन्मनि इह जन्मनि च कृतानि सर्वाणि मोचयित्वा सर्वकामानवाप्नुयात्**[12]।

एवं यस्य विष्णोरालयार्चनमग्निहोत्रं शाश्वतं तिष्ठेत् स **"तद्विष्णोः परमं पदं गच्छति"** इति ब्रह्मवादिनो वदन्ति।

**उत्सवप्रयोजनम् –**

परमात्मनः उत्सवकाले क्रियमाणं भेरीमृदङ्गपटहादिमङ्गळ-वाद्यानां ध्वनिः यावत्पर्यन्तं व्याप्यते तावत्प्रान्तपर्यन्तं भूत, प्रेत, पिशाचादीनां सञ्चारः असम्भवः इत्यादि विधानेन उत्सवस्य प्रयोजनं, तन्निमित्तानां च प्रशंसितमस्ति।

उत्सवकरणेन परमात्मा सुप्रीतः भूत्वा ब्राह्मणादिसमस्तवर्णानां समृद्धिं, सस्यवृद्धिं, माङ्गळ्यं, सर्वसम्पल्लाभः, अशुभपरिहारः, ग्रामशान्तिः, सर्वाभीष्टसिद्धिः च कारयति। तेन देवतास्सर्वे तृप्तिं प्राप्नुवन्ति। उत्सवकर्ता पुरुषः रहस्येण तथा प्रकाश्यमाणः पूर्वजन्मनि, अस्मिन् जन्मनि कृत पापात् विमुक्तिं प्राप्य सर्वाभीष्टफलं प्राप्नोति। सर्वात् अग्निहोत्रतुल्यं (समानं) भगवदाराधनं भूम्यां शाश्वतेन भविष्यति। यः भक्त्या भगवदाराधनं करोति सः अवश्यं वैकुण्ठं प्राप्नोति।

**उत्सवफलम् –** भगवदालयेषु प्रवर्तमानाः उत्सवाः लोकशान्तये प्रजानां सन्तोषाय आरोग्याय राज्ञः राष्ट्रस्य च अभिवृद्धये भवन्ति।

अनेन एतेन उत्सवानुष्ठानेन भगवान् सुप्रीतः भवति, ब्राह्मणादिचातुर्वर्ण्यस्य संवृद्धिः सस्यवृद्धिः शुभं सर्वसम्पल्लाभः अशुभनिवृत्तिः, ग्रामशान्तिः सर्वाभीष्टसिद्धिश्च भवति।

देवताः तृप्ताः भवन्ति, उत्सवानुष्ठातु पुरुषस्य पूर्वजन्मसु अस्मिन् जन्मनि वा कृतं प्रकाशं रहस्यं वा पापं (नुत्तं) नुन्नं भवति। सः सर्वाभीष्टान् प्राप्नोति। अग्निहोत्रसदृशं भगवदाराधनं भूम्यां शाश्वतं भवति। उत्सवानां कर्ता वैकुण्ठं प्राप्नोति।

भगवतः उत्सवकाले क्रियमाणे भेरीमृदङ्गपटहादिमङ्गलवाद्यध्वनिव्याप्ते तस्मिन् प्रदेशे भूतप्रेतपिशाचादीनां सञ्चारस्यावकाशः न भवति। एवं उत्सवस्य प्रयोजनं तन्निमित्तं च प्रशस्यम्।

एवमेव भृगुप्रोक्त यज्ञाधिकारे उत्सवानुष्ठानफलं विस्तरेण निरूपितम्।

**एवं यः कुरुते भक्त्या देवदेवस्य चोत्सवम्।**
**पञ्चसम्बन्धिभिस्सार्थं विष्णुलोकं स गच्छति।**
**सर्वलोकस्य शान्तिः स्यात्सर्वदुःखनिवारणम्।**
**वर्षदं सर्वलोकस्य सस्यानामभिवृद्धिदम्।**
**राष्ट्रस्य वृद्धिदं चैव राज्ञां च बलवर्धनम्।**
**सन्ततीनां समृद्धिस्स्याद्वेदानामुपबृंहणम्।**
**भेरीपटहशङ्खानां यावद्व्याप्नोति वै ध्वनिः।**
**पिशाचाः प्रेतरक्षांसि तावन्नैव विशन्ति वै।**
**तस्मात्सर्वप्रयत्नेन कारयेदुत्सवं हरेः॥**

भक्त्या यः उत्सवं आचरति सः पितृपितामहप्रपितामहपुत्रपौत्राः इति पञ्चसम्बन्धिभिः सहितः आत्मना अष्टः वैकुण्ठे निवासं प्राप्नोति। सर्वेषां लोकानां शान्तिर्भवति, उत्सवकाले भेर्यादिध्वनिना भूतप्रेतपिशाचाः पलायिताः भवन्ति।

एवं श्रीपाञ्चरात्रे पाद्मसंहितायामपि एकादशे अध्याये उत्सवप्रयोजनं सप्तदशश्लोकैः उपवर्णितम्।

**श्रद्धया वासुदेवस्य साङ्गोपाङ्गं सदक्षिणम्।।** 269 ।।
**उत्सवं देवदेवस्य यः कुर्यात्स कुलं स्वकम्।**
**उत्तारयन् स्वयं विष्णोः सायुज्यं गच्छति ध्रुवम्।।** 270 ।।
**हयमेधसहस्रेण यजते यः समाहितः।**
**यश्चोत्सवेन यजते तयोस्तुल्यफलान्वयः।।** 271 ।।
**यागानामपि सर्वेषां फलमुत्सवकर्मणा।**
**देवस्याश्नुवते सर्वं यष्टारो नास्ति संशयः।।** 272 ।।

**राजराष्ट्रादीनामभ्युदयकथनम् -**
**उपकुर्वन्ति ये मर्त्या देवस्योत्सवकर्मणि।**
**कर्मणा मनसा वाचा तेऽपि यान्ति यथेप्सितम्।।** 273 ।।
**ग्रामे वा नगरे वाऽपि पत्तने वा महोत्सवः।**
**विष्णोः प्रवर्तते यत्र देशे राष्ट्रेऽपि वा भवेत्।।** 274 ।।
**भयं न मृत्यो न व्याधेः न दुर्भिक्षादिसम्भवः।**
**नश्यन्ति तस्करास्तत्र नाधर्मस्सम्प्रवर्तते।।** 275 ।।
**धर्मयुक्तो भवेद्राजा जना धर्मपरायणाः।**
**भवन्ति सुखिनः सर्वे सर्वदुःखविवर्जिताः।।** 276 ।।
**महोत्सवे वर्तमाने यदर्थिभ्यः प्रदीयते।।**
**पानीयमन्नं वस्त्रं वा तत्सहस्रगुणं भवेत्।।** 277 ।।
**उत्सवेऽधिकृतानां भगवत्प्रसादः -**
**पुष्पमूलफलैरिज्या देवस्याभरणादिकैः।**
**क्रियमाणा यथाशक्ति फलानन्त्याय कल्पते।।** 278 ।।
**सेवन्ते तत्र ये देवमहर्निशमतन्द्रिताः।**
**तेषामिदमियच्छेति फलं वक्तुं न शक्यते।।** 279 ।।
**आलेपनं मार्जनं च रजः प्रशमनं तथा।**
**वारिभिः दीपिकारोपं क्ष्वेलनास्फोटनादिकम्।।** 280 ।।
**कुर्वन्ति ये ब्रह्मलोकं ते यान्त्यमरदुर्लभम्।**
**यानं वहन्ति ये विप्रा ते यान्ति ब्रह्मणः पदम्।।** 281 ।।
**रथं वहन्ति ये चाश्वास्तेऽपि यान्ति सुरालयम्।**
**छत्रादिधारिणश्चापि मोदन्ते दिवि मानवाः।।** 282 ।।
**देशिको मूर्तिपाश्चैव तथैव परिचारकाः।**
**उत्सवेऽधिकृता विष्णोः प्राप्नुवन्ति यथेप्सितम्।।** 283 ।।
**ऋचो यजूंषि सामानि ये तत्राधीयते जनाः।**
**ते परे व्योम्नि देवस्य पार्श्वे वर्तन्ति निस्स्पृहाः।।** 284 ।।
**देवस्य कळ्याणाराधनम् – सर्वक्षेमकरम् -**
**सर्वशान्तिकरं सर्वदुःखोत्साधनमुत्तमम्।**
**राज्ञो राष्ट्रस्य सुखदमायुरारोग्यवर्धनम्।।** 285 ।।
**प्रजानां वासुदेवस्य कल्याणाराधनं महत्।**
**इमं देवादयस्सर्वे विष्णोरुत्सवमुत्तमम्।।** 286 ।।
**कृत्वा शाश्वतिकं स्थानं प्रापुरत्यन्तदुर्लभम्**[13] । 287 ।

उत्सवकारी विष्णोः सायुज्यं गच्छति अश्वमेधसहस्रफलं प्राप्नोति सर्वेषां यागानां फलं प्राप्नोति उत्सवनिर्वहणे सहायकाः अपि आप्तकामाः भवन्ति। उत्सवानुष्ठानेन देशे ग्रामे राष्ट्रे वा मृत्योः भयं व्याधिभयं, दुर्भिक्षभयं, चोरभयं च न भवति। राजा धार्मिकः, प्रजाः धर्मपरायणाः सुखभाजश्च भवन्ति। उत्सवे समर्पितस्य द्रव्यस्य सहस्रगुणं दाता पुनः प्राप्नोति। फलमपि आनन्त्याय कल्पते। उत्सवे आलेपनादिकरणेन ब्रह्मलोकं प्राप्नुवन्ति भगवद् यानं रथं, छत्रं वा ये वहन्ति तेऽपि विष्णोः पदं प्राप्नुवन्ति।

**उत्सवत्रैविध्यम् –**

उत्सवश्च कालोत्सवः, श्रद्धोत्सवः, निमित्तोत्सवः इति त्रिविधः।

**1.कालोत्सवः –** प्रतिसंवत्सरं तत्तन्मासे तत्तद्दिने नित्यं सङ्कल्पनेन यः क्रियते स कालोत्सवः।

**2.श्रद्धोत्सवः –** श्रद्धायामुत्पन्नायां यथेष्टमासे यः क्रियते सोऽयं श्रद्धोत्सवः।

**3.निमित्तोत्सवः –** अवग्रहदुर्भिक्षाद्युभयशान्त्यर्थं कृतो उत्सवः निमित्तोत्सवः।

अस्मिन् उत्सवत्रये मुख्यः कालोत्सवः इति मरीचिसंहितायाम् एकपञ्चाशत्तमः (51) पटले स्पष्टमुक्तम्। इममेव कालोत्सवं, महोत्सवं, ब्रह्मोत्सवं, कल्याणोत्सवमिति व्यवहरन्ति।

पाञ्चरात्रागमेषु उत्सवशब्दः प्रकारान्तरेण व्याख्यातः – ब्रह्मा महोत्सवस्वरूपं तत्फलं किं स्वरूपं इति नारायणं पप्रच्छ। भगवान् एवं समादधे –

**आराधनमिदं ब्रह्मन् मोक्षकामैरनुष्ठितम्।**
**पश्चाधिफलकामैस्तु दुरनुष्ठेयमद्भुतम्।।** 3 ।।
**तोषणं मम कल्याणमनुष्ठितममानुषम्।**
**देवैरेव पुरा वृत्रवधे तत्पापनुत्तये।।** 4 ।।
**इन्द्रेणापि दिविष्ठेन मामुद्दिश्य कृतं शुभम्।**
**रूपं तस्य प्रवक्ष्यामि यथावदवधारय।।** 5 ।।

**उत्सवशब्दनिर्वचनम् -**

**सवः सांसारिकं दुःखमुत्तरन्ति तदम्बुधिम्।**
**यष्टार इति विद्वांसो निर्ब्रुवन्त्युत्सवाह्वयम्**[14] ।। 6 ।।

मुमुक्षुभिः एव महोत्सवः क्रियते। सकामाः उत्सवमनुष्ठातुं न प्रभवन्ति पुरा वृत्रवध पापनिवृत्तये इन्द्रः महोत्सवमाचरितवान्।

सव शब्दस्य संसारजन्यं दुःखमर्थः। ये तत् दुःख तितीर्षवः तैराचरितः उत्सवः इति पाद्मसंहितायां चर्यापादे दशमाध्याये उत्सवशब्दो निरुक्तः।

**पारमेश्वरसंहितायामपि –**

**महोत्सवं प्रवक्ष्यामि यथावन्मुनिपुङ्गव !।**
**सव इत्युच्यते दुःखं विद्वद्भिः समुदाहृतम्।।** 2 ।।
**उद्गतः स सवो यस्मात्तस्मादुत्सव उच्यते**[15] । 3 ।

**शैवसंहितासु** उत्सवशब्दः एवं व्याख्यात –

**कारणागमे** एकचत्वारिंशदुत्तरशततमे (141) अध्याये पूर्वकारणे उत्सवशब्दार्थः एवं निरूपितः। सव शब्दः सृष्ट्यर्थकः उत् शब्दः उद्भवार्थकः इति आरभ्य उत्सवाचरणेन लभ्यं फलं विस्तरेण उदाहृतम्।

उत्सवाचरणेन देशे अकालमृत्युः, दारिद्र्यं, पापाचरणं, लोभात् मोहात् वा भयं, दुर्भिक्षं, रोगः, तापश्च न भवति इति विस्तरेण उपवर्णितम्।

**उत्सवस्य विधिं वक्ष्ये सर्वसिद्धिप्रदं शुभम्।**
**सव इत्युच्यते सृष्टिस्तदुत्स्याच्छब्दभाषितम्।।** 1 ।।
**उद्भूतसृष्टिकार्यत्वादुत्सवः कथितो मया। इत्यारभ्य**
**यदेतत्क्रियते राष्ट्रे ध्वजयष्टिनिवेशनम्।।** 92 ।।
**नाकालमृत्युस्तत्रास्ति नालक्ष्मीः पापकृज्जनः।**
**लोभसर्गभयं तत्र नो परागो न विभ्रमः।।** 98 ।।
**विपरीतं च दुर्भिक्षं रोगं चैव महातपाः।**
**काले वर्षति पर्जन्यः स्वाभीष्टं लभते जनः**[16] ।। 99 ।।

सव शब्दस्य सृष्टिः इत्यर्थः। परमेश्वरकृतां सृष्टिं अभिनन्दतीति अस्य महत्कार्यस्य उत्सवः इति व्यवहारः। ध्वजारोहणपूर्वकं उत्सवे प्रवर्तमाने देशे अकालमृत्युः न भवति। दारिद्र्यं न प्रविशति, पापिष्ठाः न भवन्ति। लोभमोहाभ्यां भयं, उपरागः, विभ्रमः वैपरीत्यं, अनावृष्टिः रोगाः तापः इत्यादयः अनिष्ठाः न भवन्ति। पर्जन्यः काले वर्षति, देशः सुभिक्षो भवति, प्रजाः अभीष्टसिद्धिवत्यः भवन्ति।

आगमोक्तार्थात् अन्योऽपि अर्थः लोकव्यवहारे कोशेषु च दृष्टः। प्रेम्णः सन्तोषस्य कार्यसिद्धेः वा साफल्यनिरूपणार्थं उत्सवशब्दः प्रयुक्तः। एषोऽपि अर्थः भगवदुत्सवविषयेऽपि सङ्गतः एव।

“उत्सवः पुं, नियताह्लादजनकव्यापारे उपनयनविवाहादौ. षू-प्रेरणे, पचाद्यच्।
यद्वा उत्सवनम् षू प्रसवैश्वर्ययोः ऋदोरप् (शब्दार्थचिन्तामणिः)”

“उत्सूते सुखमित्युत्सवः, षूङ् प्राणिगर्भविमोचने – सुवति प्रेरयति वा जनानिति वा उत्सवः। षू प्रेरणे। (लिङ्गाभट्टीयम्)”

“उत्सवो मह उद्धर्ष उद्धवो हर्षरेणुकः क्षणः पर्व च कल्याणम् (वैजयन्ती)”

**मायावी परमानन्दः त्यक्त्वा वैकुण्ठमुत्तमम्।**
**स्वामिपुष्करिणीतीरे रमया सह मोदते।।**
**श्रियः कान्ताय कल्याण निधये निधयेऽर्थिनाम्।**
**श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गळम्।।**

**संक्षिप्ताक्षरसूची –**

1.पुराण.प – पुराणपर्यालोचनम्
2.अ.को – अमरकोशः
3.भ.गी – भगवद्गीता
4.मरीचि – विमानार्चनाकल्पः
5.समूर्ता – समूर्तार्चनाधिकारः
6.म.भा.व.पर्व - महाभारतवनपर्वः
7.म.भा.भी.पर्व - महाभारतभीष्मपर्वः
8.म.भा.उ.पर्व - महाभारत उद्योगपर्वः
9.पाद्म.सं - पाद्मसंहिता
10.पार.सं - पारमेश्वरसंहिता
11.का.आ - कारणागमः

**उपयुक्तग्रन्थसूची -**

1. **विमानार्चनाकल्पः** – मरीचिः, Edited – R.B. पार्थसारथि भट्टाचार्यः, श्रीवेङ्कटेश्वरस्वामिदेवस्थानम्, द्वारका तिरुमल, पश्चिमगोदावरि मण्डलम्, 1979.

2. **समूर्तार्चनाधिकरणम्** – अत्रिः, Edited – R.B. पार्थसारथि भट्टाचार्यः, ति.ति.दे. प्रेस्, Series No-489, 2001.
3. **अमरकोशः** – अमरसिंहः, प्रकाशकः – कोण्डा शङ्करय्य बुक् डिपो, महाकाळिवीधि, सिकिन्दराबाद् (डक्कन्), मुद्रणवत्सरः – 1949.
4. **पुराणपर्यालोचनम् (समीक्षात्मकभागः)** – Translator - Prof. Shrikrishnamani Tritpathi, Hod of the Dept. of Puranetihas, SSS Vishwa Vidyalaya – Varanasi, Edited by – Sripati awasthi & Vishwanath Pandey, Printer – Chaukhamba Surbharati Prakashan, Varanasi, Publishers & Oriental book sellers – The chaukhamba vidyabhawan, Varanasi, First Edition year – 1975.
5. **पाद्मसंहिता (चर्यापादः)** – सम्पादकः – गोमठं नारायणज्योतिकेण मैसूरुनगर्यां कारोनेषन् मुद्रणालये मुद्रापितः, मुद्रापकः – गोमठं श्रीनिवासज्योस्यर् & सन्स्, 712, त्यागराजरोड्, 2 क्रास्, के.आर्. मोहल्ला, मैसूर्, मुद्रणवत्सरः – 2009.
6. **पारमेश्वरसंहिता** – संशोधकः – श्रीरङ्गं श्रीगोविन्दाचार्यः, मुद्रापकः – श्रीरङ्गं कोडण्डरामसन्निधि, यस्.आर्. विजयराघव अय्यङ्गार्येण त्रिशिरःपुरस्थकळ्याणमुद्रणालये सम्मुद्रप्रकाशित, 122 नार्त् चित्रावीधि, श्रीरङ्गं – तिरुच्चि, मुद्रणवत्सरः – 1953.
7. **भगवद्गीता** – आन्ध्रानुवादः – श्रीशिष्टा सुब्बाराबु, सम्पादकः – डा. यस्.बि. रघुनाथाचार्यः, टिटिडि आर्.पि.यस्.नं-11, प्रकाशकः, मुद्रापकः – टिटिडि प्रेस्, तिरुपतिः, 9th Edition – 1996.
8. **महाभारतम् (वनपर्वः)** – सम्पादकौ – डा. तिप्पाभट्ल रामकृष्णमूर्ति, डा. सूरं श्रीनिवासुलु, भागः-2 गीताप्रेस्, गोरख् पूर्, सिरीस् नं – 2142, प्रकाशकः-मुद्रापकः –गीताप्रेस्, गोरख् पूर्, इण्डिया। द्वितीयमुद्रण – 2018
9. **महाभारतम् (विराट-उद्योगपर्वौ)** – सम्पादकौ – डा. तिप्पाभट्ल रामकृष्णमूर्ति, डा. सूरं श्रीनिवासुलु, भागः-3 गीताप्रेस्, गोरख् पूर्, सिरीस् नं – 2143, प्रकाशकः-मुद्रापकः –गीताप्रेस्, गोरख् पूर्, इण्डिया। द्वितीयमुद्रण – 2018.
10. **महाभारतम् (भीष्म-द्रोणपर्वौ)** – सम्पादकौ – डा. तिप्पाभट्ल रामकृष्णमूर्ति, डा. सूरं श्रीनिवासुलु, भागः-2 गीताप्रेस्, गोरख् पूर्, सिरीस् नं – 2144, प्रकाशकः-मुद्रापकः– गीताप्रेस्, गोरख् पूर्, इण्डिया। मुद्रणवत्सरः – 2019.
11. **कारणागमः (पूर्वभागे चरमसम्पुटम्)** – प्रधानसम्पादकः – आचार्य के.ई. देवनाथन्, सम्पादकः – यम्.यस्.आर्. शास्त्रि, मुद्रापकः - श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः, मुद्रण – प्रजाशक्ति डैली प्रिण्टिङ्ग् प्रेस्, तिरुपति, मुद्रणवत्सरः – 2014. ISBN – 978-9381887-18-9.

**पाद टिप्पणी**

[1] पुराण.प – प्रथमभागः – पुट-25

[2] भ.गी. अ-18, श्लो-41-45

[3] भ.गी. अ-3, श्लो-10

[4] मोक्षेधीः ज्ञानमन्यत्र विज्ञानं वेदशास्त्रयोः .... इत्यमरः (1-5-6)

[5] म.भा.व.पर्व- 13-15 श्लो

[6] म.भा.भी.पर्व – अ-33, श्लो-26

[7] म.भा.उ.पर्व – अ-87, श्लो-13

[8] म.भा.भी.पर्व – अ-30, श्लो-32

[9] समूर्ता – 54 अ

[10] अ.को – 2-7-13

[11] समूर्ता – 55 अ

[12] काश्यप – 90 अ

[13] पाद्म.सं - अ-11

[14] पाद्म.सं – चर्यापादः – अ-10

[15] पार.सं – अ-16

[16] का.आ – 141 अ